# वराहपुराणम्

भूदेवीकृतप्रश्नानां भगवान् यदुत्तरमाह तदेव वराहपुराणमिति प्रथितम् । 'वाराहं द्वादशम्' इति वचनानुसारेण पुराणमेतद् अष्टादशपुराणेषु द्वादशतममिति ज्ञायते । 'पुराणानां सर्वेषां वाराहं घृतसम्मितम्' (पुराणाख्यगोरसमध्ये वाराहं घृततुल्यम्) इति वचनं तु वराहपुराणस्य गरिमाणं, महिमानं च सम्यगेव प्रत्यपादयत् । सात्त्विकपुराणेष्वन्यतममेतत्पुराणम् ऐहिकामुष्मिकसकलेष्टार्थदमिति प्रसिद्धमस्ति ।

## अध्यायः - १

## प्रथमाध्यायस्य सारः

'नमस्तस्मै वराहाय लीलयोद्धरते महीम् ।
खुरमध्यगतो यस्य मेरुः खणखणायते ।।' (व.पु. १.१)

इति मङ्गलश्लोकेन सूतपुराणिकानां विषयप्रस्तावनया च पुराणमिदं प्रारभ्यते । भगवान् वराहरूपमास्थाय प्रळयजलधेः भूदेवीं लीलयोद्धधार । तदा सा भगवन्तं पृच्छति- स्वामिन् ! केशव ! प्रतिकल्पं मामुद्धरसि । मत्स्यादिरूपेणावतीर्य महतीमुपकृतिं जगतः विदधासि ।

'न च जानाम्यहं देव तव किञ्चिद् विचेष्टितम् ।' (व.पु. १.११)

देव ! तव विचेष्टितमल्पाहऽहं न जानामि । मामुद्धृत्य त्वं कथं सृजसि ? तत्र कारणं किम् ? इति भूदेवी भगवन्तं पप्रच्छ । तच्छ्रुत्वा भगवान् अहसत् । तदा भदेवी तस्य कुक्षौ सप्तलोकान् ददर्श । आश्चर्यचकिता सा चक्षुषी न्यमीलयत् । पश्चाच्चक्षुरुन्मील्य शेषशायिनं भगवन्तं दृष्ट्वा, कृताञ्जलिपुटा स्तुतिं चक्रे ।

## अध्यायः - २

भूदेव्याः स्तोत्रेण भगवान् सन्तुष्टोऽभूत् । स वराहरूपमास्थाय तस्यै दर्शनमदात् । पश्चात् तां प्रति पुराणलक्षणान्यकथयत् । सर्गः, प्रतिसर्गः, वंशः, मन्वन्तरं, वंशानुचरितम् इति पुराणानामाहत्य पञ्चलक्षणानि वर्तन्त इत्यवर्णयत् । ततः पश्चात् सर्गमधिकृत्य - महत्तत्त्वम्, अहङ्कारतत्त्वम्, दशेन्द्रियाणि, पञ्चभूतानि इत्येतेषां सृष्टिमधिकृत्य निरूपयामास । तदनु रुद्र-सनकादीनां, मरीच्यादीनामुत्पत्तिमकथयत् । दक्षकन्यासु जातानां देव-दानव-गन्धर्व-उरग-पक्षिणां विचारः, एकादशरुद्राणां जन्मवृत्तान्तः, युगमहिमा इत्याद्यनेकविषयांश्च भूदेवीं प्रति भगवता निरूपिताः । अपि च स्वायम्भुवमनोः ज्येष्ठपुत्रस्य प्रियव्रतस्य सभां प्रति नारदमहर्षीणामागमनं, श्वेतद्वीपे तैः सन्दर्शितसावित्रीदेव्याः विचारः, तया वेदादिप्राप्तिः इत्याद्यनेके विषया अध्यायेऽस्मिन् निरूपिताः ।

## अध्यायः - ३

प्रियव्रतमहाराजः नारदं पृच्छति- पूज्याः ! भवतां पूर्वजन्मवृत्तान्तं निवेदयत इति । तदा नारदमहर्षयः सावित्रीवचनानुसारेण स्वेषां वेदसरसि अवगाहनं, तेन जातं जन्मान्तरस्मरणम् इत्यादिकं प्रियव्रतमहाराजाय न्यवेदयन् । अहं प्राग्जन्मनि अवन्तीपुरे वेदशास्त्रपारङ्गतः, धनवान्, सारस्वताख्यः ब्राह्मण आसम् । तदा संसारे जातवैराग्यस्य मम तपः कर्तुं सारस्वतसरो गन्तुमिच्छा समजनि । तदनु अहं, कर्मभिः विष्णुं, श्राद्धेन पितॄन्, यज्ञैर्देवान् आराध्य, पुष्करमिति प्रथितं सारस्वतसरः प्राप्तः । तत्र विष्णुं भक्त्या ब्रह्मपारस्तोत्रेण समतोषयम् । तेन सन्तुष्टो भगवान् प्रत्यक्षो भूत्वा, नारद इति नाम मे दत्वाऽदृश्योऽभूत् । पश्चादहं ब्रह्मलोके स्थित्वा ब्रह्मणो दिने भूमौ जातः । एवं नारायणं ध्यात्वा तदनुग्रहेणेदानीं गुरुरहमस्मि । तस्मात् प्रियव्रत ! त्वमपि विष्णुपरायणो भव इति नारदमहर्षयः प्रियव्रतमुपदिदिशुः ।

**नामानुक्रमणिका**

१. **अवन्तीपुरम्** - एकं नगरम् (व.पु. ३.३)

२. **सारस्वतः** - एकः द्विजोत्तमः (व.पु. ३.३)

३. **सारस्वतम्** - एकं सरः (व.पु. ३.७)

**नामनिर्वचनम्**

१. **नारदः** -

नारं जलं दत्वा पितॄन् सन्तर्पितवान् नारदः । अतः नारद इति सः प्रसिद्धोऽभूत् ।

'नारं पनीयमित्युक्तं पितॄणां तद्ददौ भवान् । तदाप्रभृति ते नाम नारदेति भविष्यति ।।' (व.पु. ३.२३)

**स्तोत्रानुक्रमणिका**

१. **ब्रह्मपारस्तोत्रम् (नारदकृतम्)**

'परं पराणाममृतं पुराणं पारम्परं विष्णुमनन्तवीर्यम्' (व.पु. ३.१०) इति श्लोकादारभ्य स्तुतो प्रसन्नः जगाद मां नीरदतुल्यघोषम् । 'वरं वृणीष्वेत्यसवृतोऽहं तस्यैव देहे लयमिष्टवांश्च ।' (व.पु. ३.२०) इति श्लोकपर्यन्तमिदं स्तोत्रमस्ति ।

**अध्यायः - ४**

भूदेवी वराहरूपिभगवन्तं पृच्छति- देव ! नारायण एव परमात्मा उताहो न ? इति । तदा वराहरूपी भगवान् कथयति- 'देवि ! मत्स्य-कूर्म-वराहादिरूपाण्यपि मम अवताररूपाण्येव । भगवतः परमं रूपं देवैरप्यदृश्यम् । तस्माद् मत्स्याद्यवताररूपाण्येव भगवद्दर्शनाकाङ्क्षिणां सोपानानि । ब्रह्मा भगवतो राजसमूर्तिः । अष्टमूर्तिः रुद्रः भगवतस्तामसमूर्तिः । पृथिवी, जलं, तेजः, वायुः, आकाशः, आत्मा, सूर्यः, चन्द्रः इत्येता अष्टमूर्तयः । भगवान् नारायणः समग्रं जगदिदं व्याप्तवानस्ति । इत्युक्त्वा, विषयस्यास्य दृढीकरणार्थम् अश्वशिरनृपतेः, कपिलजैगीषव्ययोः मुनिवरेण्ययोर्मध्ये संवृत्तां संवादरूपकथां कथयति ।

**नामानुक्रमणिका**

१. **अश्वशिराः** - एकः परमधार्मिकः (व.पु. ४.१३)

२. **कपिलः** - एकः योगिवर्यः (व.पु. ४.१४)

३. **जैगीषव्यः** - एकः योगी (व.पु. ४.१४)

**अध्यायः - ५**

वराहरूपी भगवान् भूदेवीं प्रति कथयति- देवि ! पूर्वम् अश्वशिरा नाम नृपः कपिलमुनिमपृच्छत । 'कर्मणा प्राप्यते मोक्ष उताहो ज्ञानिना मुने' (व.पु. ५.४) । तदा कपिलमुनिः कथयति- राजन् ! इममेव प्रश्नं ब्रह्मपुत्रः रैभ्यः, वसुराजा च बृहस्पतिसविधे कृतवन्तावास्ताम् । तदा बृहस्पतिः 'यत् किञ्चित् कुरुते कर्म पुरुषः साध्वसाधु वा । सर्वं नारायणे न्यस्य कुर्वन्नपि न लिप्यते ।।' (व.पु. ५.१७)

मनुष्यैः स्वैः क्रियमाणानि कर्माणि साध्वसाधुकर्माणि वा, नारायणाय समर्पयेत् । तेन तत्कर्मलेपो न भवति । विषयेऽस्मिन् निष्ठुरकाख्यस्य व्याधस्य अत्रिवंशजेन संयमनाख्येन ब्राह्मणेन साकं संवादः समजनि । यश्च, धर्मारण्ये भागीरथीस्नानार्थमागत आसीत् ।

## अध्यायः - २१२

यमलोकान्नादरनिर्गमनं, नचिकेतसं सत्कृत्य यमेन प्रेषणं, नचिकेतसः वचः श्रुतवताम् ऋषीणां स्थितिः, यमलोकादागतं नचिकेतसं दृष्ट्वा उद्दालकस्य हर्षः, इत्यादिविषया अस्मिन्नध्याये निरूपिताः ।

## अध्यायः - २१३

## गोकर्णेश्वरमहिमा

पूर्वं देवानां तारकासुरस्य मध्ये युद्धमभवत् । तस्मिन् युद्धे देवास्तारकासुरं निजघ्नुः । पश्चाद् देवेन्द्रः स्वस्थानं लब्ध्वा सुखी आसीत् । तदा सनत्कुमारश्चतुर्मुखस्य समीपे पृच्छति- प्रभो ! उत्तरगोकर्णक्षेत्रं तथा दक्षिणगोकर्णक्षेत्रं च कथं प्रतिष्ठापितमभूत् ? शृङ्गेश्वरक्षेत्रस्य विषये प्रमाणं किम् ? ईश्वरस्तस्मिन् क्षेत्रे मृगरूपं कथं दधार ? मृगरूपदेहस्तत्र कथमासीत् ? देवताभिः कथं लब्धम् ? एतत्सर्वं मे कथय ।

ब्रह्मा कथयति- वत्स ! मन्दस्योत्तरदिशि ‘मञ्जुवन्त’ (मञ्जुवान्?) इति पर्वतमेकमस्ति । देवादिभिः सेविते तस्मिन् पर्वते, ईश्वरः स्थाणुरिति नाम्ना सदा सन्निहितोऽस्ति । तं भगवन्तं सेवितुं देवास्तत्राऽगच्छन्ति ।

त्रेतायुगे नन्दीति महर्षिः शङ्करमुद्दिश्य तीव्रं तपस्तेपे । तस्य तपसा प्रसन्नो भगवान् प्रत्यक्षोऽभूत् । ‘वरान् वरय’ इत्यवादीत् । तदा नन्दी वरान् वव्रे- ‘विना त्वामन्यस्मिन् भक्तिर्मा भूत् । तपोनरतः सन् कोटिरुद्रमन्त्रजपेन रुद्राराधने मग्नस्य मम विघ्नो मा भूत् । तथाऽनुगृहाण’ इति ।

तस्य वचः श्रुत्वा हसन् रुद्र एवमवादीत्- ब्रह्मर्षे ! तव तपसा सन्तुष्टोऽस्मि । उत्तिष्ठ । सहस्रवर्षपर्यन्तं तपस्तप्तवानसि । त्रिकोटिरुद्रमन्त्रं जपितवानसि । देव-दानवैः यन्न कृतं तत्कर्म त्वया कृतम् । इतःपरं त्वां द्रष्टुमिन्द्रादिदेवतास्तत्राऽगच्छन्ति । त्वं जरामरणरहितः सन् अनेनैव देहेन देवानां दुर्लभां गणेश्वरपदवीं प्राप्स्यसि । इतःपरं त्वं नन्दीश्वर इति पदवीं प्रख्यातिं गमिष्यसि । ममापरावतारं त्वां देवता अपि वन्दन्ते । मदनुग्रहकामाः सर्वे देवास्त्वामाराधयिष्यन्ति । मम भक्ता देव-दानव-गन्धर्वाः, यक्ष-राक्षस-नागाश्च त्वामाश्रयन्ते । त्वयि यः कोऽपि कुप्यते चेत् तस्मिन्नहं कुप्यामि । त्वत्तोऽधिकं प्रियः मे कोऽपि नास्ति । एवमुक्त्वा अपेक्षितान् वरान् सर्वान् तस्मै दत्वा परमेश्वरोऽन्तरधात् ।

## अध्यायः - २१४

ईश्वरस्य वरेण नन्दी गणाधिपत्यं त्रिनेत्र-चतुर्भुजादिकं च लब्ध्वा महामहिमाऽभूत् । तेन स्वस्थानस्य च्युतिः स्यादिति भयेन देवेन्द्रः ब्रह्मविष्ण्वोः सकाशमगच्छत् । पश्चात् तौ पुरस्कृत्य देवैः साकमीश्वरदर्शनार्थं मञ्जुवत्पर्वतमागत्य, तत्र नन्दीश्वरं सन्दृश्य ‘ईश्वरः कुत्रास्ति ?’ इति पप्रच्छ । तदा नन्दी, ईश्वरः मामनुगृह्याऽदृश्योऽभूत् । स कुत्रास्ति इति नाहं जाने । भवन्त एव तमन्विषत इत्यकथयत् ।

सनत्कुमारः ब्रह्माणं पृच्छति- शङ्करेण नन्दिनं प्रति किं कथितम् ? स नन्दी ईश्वरस्थितं प्रदेशं किमर्थं नाकथयत् ? अत्र किमपि रहस्यमस्ति । तन्मे कथय ।

ब्रह्मा कथयति- सनत्कुमार ! ईश्वरः देवतानां विषये किमकथयदिति मया न वक्तव्यम् । स देवो नन्दिनं प्रति किमकथयत् ? इत्येतत् त्वां प्रति कथयामि, श्रुणु । हिवमवत्पर्वतस्य समीपे तपोवनैर्युक्तः सिद्धिप्रद एकः भूप्रदेशोऽस्ति । यत्र ‘श्लेष्मात्मकः’ इति नाम्ना प्रथितः नागोत्तमो वसति । तपसा दग्धपापः सोऽवश्यं मयाऽनुग्राह्योऽस्ति । तस्मिन् श्लेष्मात्मके वने मृगरूपेण सञ्चरन्तं मां देवा अन्विषन्तु । विषयोऽयं कस्यापि न वक्तव्य इति नन्दिनं प्रति कथयित्वा ईश्वरोऽदृश्योऽभूत् । स नन्दी यत्र स्थितस्तत्स्थलं प्रति ऋषयः देवताश्चाजग्मुरिति विषयोऽयमस्मिन्नध्याये निरूपितः ।

## अध्यायः - २१५

ब्रह्मा सनत्कुमारमुनिं प्रति कथयति नन्दीश्वरस्य महिम्ना भीता देवाः शिवस्य दर्शनमपेक्ष्य ब्रह्म-विष्णुभ्यां साकं तं

लोकत्रये अन्वेषयामासुः । अन्ततस्तेषां हिमवत्पर्वतस्य श्लेष्मात्मकवने शिवदर्शनमभूत् । शिवस्तेषां शैलेश्वरक्षेत्रस्य माहात्म्यमकथयत् । इत्यादिविषयोऽस्मिन्नध्याये निरूपितोऽस्ति ।

## अध्यायः - २१६

श्लेष्मात्मकवने मृगरूपेण सञ्चरतः शिवस्य विषयं, ब्रह्मा सनत्कुमारायाकथयत् । तदा मृगरूपेण स्थितेश्वरस्यैकैकं शृङ्गभागं प्रत्यगृह्णन् । ब्रह्मणा पाणौ गृहीतः शृङ्गभागः एकत्र स्थापितो भूत्वा उत्तरगोकर्णक्षेत्रमिति प्रथितम् । विष्णुना गृहीतो भागः एकत्र स्थापितो भूत्वा 'शृङ्गेश्वरक्षेत्रम्' इति प्रथितमभूत् । इन्द्रेण गृहीत्वा नीतः भागः स्वर्गलोके आसीत् । रावण इन्द्रजिता साकं स्वर्गमाक्रम्य देवेन्द्रं जिग्ये । पश्चान्मृगरूपिणः शिवस्य शृङ्गाग्रभागमुत्पाट्याऽनयामास रावणः । तच्च पश्चिमसमुद्रस्य तटे स्थापयित्वा, सन्ध्यावन्दनं कुर्वति सति रावणे, तद् भूमौ लग्नमभूत् । सन्ध्यावन्दनानन्तरं रावणस्तद् बलादुत्पाटयितुं नाशकत् । पश्चात् स तत्तत्रैव विहाय लङ्कां विनिर्ययौ रावणः । शृङ्गाग्रं स्वयं यत्र प्रतिष्ठितं तद् 'दक्षिणगोकर्णक्षेत्रम्' इति प्रथितम् ।

## अध्यायः - २१७

अध्यायेऽस्मिन् वराह-भूसंवादस्य फलं वर्णितम् । प्रभासक्षेत्र-नैमिषारण्य-गङ्गाद्वारादियात्रया यत् फलं लभ्यते तत्कोटिगुणितं फलं श्रीवराहपुराणश्रवण-पठनादिभिर्लभ्यते । वराहपुराणस्यैकाध्यायपारायणेन, ब्राह्मणोत्तमाय कपिलागोदानेन यत् पुण्यं लभ्यते तत्, लभ्यते । अग्निष्टोमातिरात्राभ्यां यत् फलं प्राप्नोति तत्, फलं शुचिर्भूत्वा वराहपुराणस्य दशाध्यायश्रवणेन प्राप्नोति । एतद् वराहपुराणं निरन्तरं यः श्रुणोति, पारायणं वा करोति तस्य सर्वयज्ञैः सर्वदानैः सर्वतीर्थस्नानैर्यत् फलं लभ्यते तल्लभ्यते ।

वराहरूपी भगवान् कथयति- देवि ! मयोक्तं माहात्म्यं भक्त्या यः कथयति वाचयति च तस्य पुनः पुत्रः पौत्रश्च जायते । एतत्पुराणग्रन्थं गृहे स्थापयित्वा सदा यः पूजयति तस्मै नारायणः सर्वदा प्रसीदति । एतत्पुराणग्रन्थं सम्पूज्य, गन्ध-पुष्प-वस्त्र-ग्रामादिदानैः ब्राह्मणान् पौराणिकं यस्तोषयति तादृशराजादिः सर्वपापैर्मुच्यते । विष्णुसायुज्यं च लभते ।

## अध्यायः - २१८

वराहपुराणविषयानुक्रमणिकाध्यायोऽयम् । अस्य रचयिता वीरेश्वरेण सहितः माधवभट्टः । काश्यां रचितोऽयम् । अस्मिन् वराहपुराणप्रतिपादितविषया निरूपिताः ।

**।। श्रीकृष्णार्पणमस्तु ।।**